# परिशिष्टम्

## अव्ययपदानि

अव्ययं [Indeclinable] नाम् किम्?

**सदृशम् त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु ।**

**वचनेषु च सर्वषु, यन्नव्येति तदव्ययम् ।**

यस्य शब्दस्य सर्वदा एकम् एव रुपं भवति, सः शब्दः अव्ययम् इति नाम्ना ज्ञायते। लिङ्गविभक्तिवचनमनुसृत्य तस्य परिवर्तनं न भवति।

यथा ---

**त्रिषु लिङ्गेषु** –

1. मोहनः **अपि** पतति। [पुं]
2. माला **अपि** पतति। [स्त्री]
3. फलम् **अपि** पतति। [नपुं]

**सप्तसु विभक्तिषु** –

1. गणेशः **अपि** मन्दिरे अस्ति। [प्र. वि.]
2. गणेशम् **अपि** हारं अर्पयतु। [द्वि. वि.]
3. गणेशेन सह पार्वती **अपि** अस्ति। [तृ. वि.]
4. गणेशाय नमस्करोतु। पार्वत्यै **अपि** नमस्करोतु। [च. वि.]
5. गणेशात् **अपि** आशीर्वादं स्वीकरोतु। [पं. वि. ]
6. गणेशस्य **अपि** पूजां करोतु। [ष. वि.]
7. गणेशे **अपि** भक्तिः भवतु। [स. वि.]

**त्रिषु वचनेषु** –

1. बालकः **अपि** पुस्तकं पठति। [ए. व.]
2. बालकौ **अपि** पुस्तकं पठतः। [द्वि. व.]
3. बालकाः **अपि** पुस्तकं पठन्ति। [ब. व.]

“**अपि**” इति अव्ययम् । तस्य एकम् एव रूपम् उपरि लिखितेषु वाक्येषु दृश्यते।

लिङ्गविभक्तिवचनमनुसृत्य परिवर्तनं  ना भवति।

## List of commonly used अव्ययानि|

| क्र. | अव्ययम् | Meaning in English |
|---|---|---|
| १ | अत्र | Here |
| २ | तत्र | There |
| ३ | कुत्र | Where |
| ४ | अन्यत्र | Somewhere |
| ५ | सर्वत्र | Everywhere |
| ६ | एकत्र | Together |
| ७ | च | And |
| ८ | अपि | Also or Too |
| ९ | एव | Only |
| १० | इति | That is what |
| ११ | यत् | That |
| १२ | पूर्वम् | Before |
| १३ | इदानीम् | Now |
| १४ | कदा | When |
| १५ | कुतः | From where |
| १६ | इतः | From here |
| १७ | ततः | From there |
| १८ | सह | With |
| १९ | विना | Without |
| २० | कथम् | How |
| २१ | किमर्थम् | Why |
| २२ | आम् | Yes |
| २३ | न | No |
| २४ | यतः | Because |
| २५ | निश्चयेन | Definitely |

| | | |
|---|---|---|
| २६ | शनैः | Slowly, gradually |
| २७ | उच्चैः | Loudly, high |
| २८ | पुरतः | In front |
| २९ | पृष्ठतः | Behind |
| ३० | वामतः | To the left |
| ३१ | दक्षिणतः | To the right |
| ३२ | उपरि | Above |
| ३३ | अधः | Under |
| ३४ | अन्तः | Inside |
| ३५ | अद्य | Today |
| ३६ | श्वः | Tomorrow |
| ३७ | परश्वः | Day after tomorrow |
| ३८ | प्रपरश्वः | Three days after today |
| ३९ | ह्यः | Yesterday |
| ४० | परह्यः | The day before yesterday |
| ४१ | प्रपरह्यः | The days before today |